दिनाङ्क :- 16.04.2026

प्रात: - 06:55

संसत् सत्रम्

बजटसत्रस्य त्रिदिवसीया विशेष-संसत्-सभा अद्यारभ्य अष्टादश-दिनाङ्कपर्यन्तं प्रचलति। इयं सभा मुख्यतया नारीशक्तिवन्दन-अधिनियमस्य संवैधानिक-संशोधनेषु केन्द्रीभवति। लोकसभा-राज्यसभासु महिलानां कृते त्रयस्त्रिंशत् प्रतिशतं आरक्षणस्य प्रस्तावं कृत्वा त्रयोविंशत्युत्तर-द्विसहस्रतमे वर्षे पारितस्य नारीशक्तिवन्दन-अधिनियमस्य कार्यान्वयनस्य मार्गं प्रशस्तं कर्तुं सर्वकारः त्रीन् संशोधन-विधेयकान् प्रवर्तयिष्यति । तेषां नामानि यथा संविधान-विधेयकः विंशतिः-षड्विंशतिः, केन्द्रशासितप्रदेश-विधि-संशोधन-विधेयकः विंशतिः-षड्विंशतिः तथा परिसीमनविधेयकः विंशतिः-षड्विंशतिः च सन्ति । संसदीय-कार्यमन्त्री किरेन-रिजिजुः आश्वासनं दत्तवान् यत् अस्मिन् संशोधन-विधेयके प्रत्येकं राज्यस्य, समुदायस्य क्षेत्रस्य च आकांक्षानाम् अवधानं दत्तमस्ति ।

एतन्मध्ये, काङ्ग्रेस-दलस्य अध्यक्षः राज्यसभायाम् विपक्षनेता मल्लिकार्जुन-खर्गे उक्तवान् यत् विपक्षदलानि महिला आरक्षणविधेयकस्य पक्षे सन्ति किन्तु विधेयकं यथा आनयन्ति तस्य विषये आशङ्का वर्तते ।

कांग्रेस्-नेता जयराम रमेशः उक्तवान् यत् विपक्षदलानि संसदः सदनद्वयेऽपि भागं ग्रहीष्यन्ति अथ परिसीमन-प्रावधानानां विरोधं करिष्यन्ति ।

<u>प्रधानमन्त्री- अस्ट्रिया</u>

प्रधानमन्त्री नरेन्द्र मोदी तथा आस्ट्रिया चांसलर डॉ. क्रिश्चियन स्टॉकरः अद्य नवदिल्लीनगरे विविधक्षेत्रेषु द्विपक्षीयसहकार्यं सुदृढं कर्तुं चर्चां करिष्यतः। उभौ पक्षौ बहुपक्षीय-मञ्चेषु सहयोग-सहितं परस्परहितस्य क्षेत्रीयवैश्विकविषयेषु अपि विचाराणां आदानप्रदानं करिष्यतः । सामाजिक-सन्देशे विदेशमन्त्री डॉ. एस जयशङ्करः विश्वासं प्रकटितवान् यत् प्रधानमन्त्रिणा मोदिना सह डॉ. स्टॉकरस्य चर्चाभिः विभिन्नक्षेत्रेषु अधिकसहकार्यस्य नूतनाः मार्गाः उद्घाटिताः भविष्यन्ति ।

<u>गोयल-निर्यात</u>

केन्द्रीय वाणिज्य उद्योग मंत्री पीयूष गोयलः प्रोक्तवान् यत् भारतेन विगत-वित्तवर्षे षष्ट्युत्तर-अष्टशतम् अर्बुद-अमेरिकीडॉलरस्य अभिलेखनिर्यातः साधितः। सामाजिक-माध्यमे श्रीगोयलेन उक्तं यत् वैश्विक-संकटस्य मध्येऽपि प्राप्तम् इदं लक्ष्यं देशस्य वैश्विक-व्यापार-पदचिह्न-विस्तारस्य वर्धमानं सामर्थ्यं च प्रतिबिम्बयति। सः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे कृताः नवव्यापार-सन्धयः एतां गतिं अधिकां कुर्वन्ति, नूतन-विपणीनाम् उद्घाटनं कारयन्ति, क्षेत्रेषु अधिकान् अवसरान् उद्घाटयन्ति च ।

## जनगणना 2027

गृहमन्त्रालयेन घोषितं यत् जनगणना-विंशतिः-सप्तविंशतिः इत्यस्य क्षेत्रसञ्चालनस्य प्रथमचरणम् अद्य बहुषु राज्येषु केन्द्रशासितप्रदेशेषु च आरब्धं भविष्यति। मन्त्रालयेन विज्ञप्तौ उक्तं यत् राष्ट्रियराजधान्यां दिल्ल्याम्, एनडीएमसी-प्रदेशे, अण्डमाननिकोबारद्वीपेषु, गोवा, कर्नाटक, लक्षद्वीप, मिजोरम, ओडिशा, सिक्किम इत्यादिषु क्षेत्र-संचालनम् अद्यैव आरभ्यते । मन्त्रालयेन उक्तं यत् प्रथमवारं प्रवर्तितायाः स्वगणनासुविधायाः उत्साहवर्धकं प्रतिक्रिया प्राप्ता, यत्र प्रायः द्वादश-लक्षं गृहाणि स्वविवरणं ऑनलाइन-रूपेण सफलतया प्रदत्तवन्तः।

## राष्ट्रियमहिलाआयोगः

राष्ट्रियमहिलाआयोगेन महाराष्ट्रस्य नासिकनगरे टाटापरामर्शसेवानां बीपीओ-एकके, महिलानां यौन-उत्पीडनस्य कथितघटनानां विषये मीडिया-रिपोर्ट्-सम्बद्धानां संज्ञानात् परं स्वयं प्रेरित-अभ्यर्थना सुओ-मोटु इति स्वीकृता वर्तते। एकस्मिन् वक्तव्ये आयोगेन उक्तं यत्, एतस्य घटनायाः विस्तृतपरीक्षां कर्तुं तथ्यनिर्णयसमित्याः घटनं कृतमस्ति । समितिः शनिवासरे घटनास्थानं गमिष्यति, दशकार्य-दिनानाम् अभ्यन्तरे आयोगाय स्वप्रतिवेदनं दास्यति ।

## आईपीएल

आईपीएल क्रिकेट्-क्रीडायां, गतरात्रौ रायल्-चालेंजर्स्-बेंगलूरु-दलेन लखनौ-सूपर-जायिण्ट्स्-दलं पंचस्तोभकैः पराजितम्। अद्य सायं सार्धसप्तवादने, मुम्बई- इण्डियन्स् अथ पंजाब-किंग्स् दलयोर्मध्ये क्रीडा भविष्यति ।